दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-7 ■ वर्ष-5 ■ अङ्क-292 | 1 | अगस्त 11, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणकृष्णत्रयोदशी
श्रावण 26 प्रविष्ठांशः मङ्गलमयः भवेत्


2 प्रधानमन्त्री मोदी राष्ट्रमण्डल-क्रीडायाः विजेतृभिः सह सम्भाषणम् अकरोत्; मीराबाई-चानू-महोदयाम् आगामि-पीढीनां कृते प्रेरणायाः स्रोतः अवदत्

3 नेरवा-क्षेत्राय प्राप्ता नूतना अग्नि-शमन-केन्द्रम्, ५५ सहस्र-जनेभ्यः भविष्यति लाभः; १७ पदानि द्वे 'फायर-टेंडर'-वाहने च स्वीकृते

7 मण्डीजनपदः संस्कृतशिक्षकाणाम् उपनिदेशकेन सह मेलनम् , लम्बितानां याचनानां विषये ज्ञापनम् समर्पितम्


## कोलम्बिया-देशे आगतेन ७.४ तीव्रतायाः भीषणेन शक्तिशालिना-भूकम्पेन अधुनावधि १११ जनानां मृत्योः पुष्टिः अभवत्



**हिमसंस्कृतवार्ता।** कोलम्बिया-देशे सोमवासरे (१० अगस्त, २०२६-दिनाङ्के) आगतेन ७.४ तीव्रतायाः भीषणेन शक्तिशाली-भूकम्पेन सर्वत्र भयस्य वातावरणं निर्मितम् अस्ति। भूकम्पस्य तीव्र-कम्पनेन देशस्य अनेकेषु नगरेषु बृहन्ति भवनानि तास-पत्रवत् पतितानि सन्ति, येषां भग्नावशेषेषु (मलबे) विशालसंख्यायां जनानां निमज्जनस्य (दबावस्य) सम्भावना अस्ति, येन सर्वत्र चीत्कारः मचितः अस्ति। एतस्याः भीषणायाः प्राकृतिक-आपदः कारणेन अधुनावधि १११ जनानां मृत्योः पुष्टिः अभवत्। एतदनन्तरं सर्वकारेण राष्ट्रियापातकालस्य घोषणा कृता अस्ति। अस्य भीषण-भूकम्पस्य तीव्र-कम्पनं कोलम्बिया-देशस्य समीपस्थेषु वेनेजुएला-इक्वाडोर-देशेषु अपि अनुभूतम्। ७.४ तीव्रतायाः भूकम्पनस्य जनानां मनसि भयं उत्पादितम्। अस्मिन् भीषण-आपत्काले अमरीका-देशेन कोलम्बिया-देशाय सहायतार्थं प्रस्तावः कृतः अस्ति। यदा च यूक्रेन-देशस्य राष्ट्रपतिना वोलोडिमीर-जेलेंस्की-महोदयेन कोलम्बिया-देशे भूकम्पस्य कारणेन मृतानां जनानां प्रति समवेदना व्यक्ता, तथा च अस्मिन् कठिन-समये कोलम्बिया-जनैः सह समर्थनं प्रतिबद्धतां च प्रदर्शितम्।

**अमरीका अवदत्— "वयम् सर्वसम्भवाय सहयोगाय सज्जाः स्मः"** अमरीका-देशस्य विदेशमन्त्री मार्को-रूबीयो-महोदयः सामाजिक-माध्यम-मञ्चे 'एक्स' इत्यत्र सन्देशं प्रेषयित्वा अवदत्— "राष्ट्रपति-डोनाल्ड-ट्रम्प-महोदयस्य नेतृत्वे प्रशासनं कोलम्बिया-देशे आगते शक्तिशाली-भूकम्पे अतिसूक्ष्मतापूर्वकं दृष्टिं स्थापयति, तथा च कोलम्बिया-जनतायै राष्ट्रपति-अबेलार्डो-डे-ला-एस्पिरिएला-महोदयस्य शासनाय च सर्वसम्भव-सहयोगं दातुं तत्परम् अस्ति।"सः अग्रे अवदत्— "कोलम्बिया-देशे स्थिताः अमरीकी-नागरिकाः STEP.State.gov इत्यत्र आत्मानं पञ्जीकृतं कुर्वन्तु, नवीनतम-सूचनाभ्यः च राजधानी-बोगोटा-स्थितस्य अमरीकी-दूतावासस्य 'सोशल मीडिया' खातानां अनुसरणं कुर्वन्तु इति परामर्शः दत्तः अस्ति।""

**ये स्वप्राणान् त्यक्तवन्तः, तेषां प्रति अस्माकं संवेदना अस्ति"—** जेलेंस्कीयूक्रेन-देशस्य राष्ट्रपतिः वोलोडिमीर-जेलेंस्की स्वस्य 'X' सन्देशे अवदत्— "पश्चिम-कोलम्बिया-देशे आगतस्य भूकम्पस्य वार्ता अतीव दुःखदायिनी अस्ति, यस्य प्रभावः समीपस्थे इक्वाडोर-देशे अपि अभवत्। येषां जनानां एतस्याम् आपदि मृत्युः अभवत्, तेषाम् परिवारेभ्यः तथा एतया भीषण-आपदा प्रभावितेभ्यः सर्वेभ्यः जनेभ्यः अस्माकं संवेदना अस्ति। कस्यापि जीवस्य हानिः अतीव दुःखदायिनी भवति।"

## अद्यतनीयं सुभाषितम्

**कार्यमित्येव यत्कर्म, नियतं क्रियतेऽर्जुन।**
**सङ्गं त्यक्त्वा फलं चैव, स त्यागः सात्त्विको मतः॥**

श्रीमद्भगवद्गीता- १८.९

भावार्थः- हे अर्जुन! 'केवल कर्तव्य मात्र करना है' ऐसा समझकर जो कर्म आसक्ति और फलेच्छाका त्याग करके किया जाता है, वही सात्त्विक त्याग माना गया है।


हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा


## चक्रवातस्य सम्पातानन्तरं शङ्घाई-नगरम् समेत्य पूर्व-चीन-क्षेत्रात् दशलक्षाधिकाः जनाः सुरक्षित स्थानेषु प्रापिताः

चीन-देशे डॉल्फिन्-चक्रवातस्य सम्पातानन्तरं शङ्घाई-नगरम् समेत्य पूर्व-चीन-क्षेत्रात् दशलक्षाधिकाः जनाः सुरक्षित स्थानेषु प्रापिताः। अनेन चक्रवातेन सम्पूर्ण क्षेत्रे भीषण-वृष्टिः अजायत, येन यातायात-सौविध्यम् अबाधत। अत्रावधेयं यत् अद्य शङ्घाई-नगरे प्रायः सहस्राधिकाः विमानसेवाः निरस्ताः। एतदतिरिच्य शांडोंग-हेनान हुबेई-अनहुई-जियांगसू-झेजियांग-प्रान्तेषु अतीव तीव्रवृष्टेः पूर्वसूचना प्रदत्ता । शङ्घाई-नगरेऽपि अतितीव्र-वृष्टेः सम्भावना वर्तते। प्रशासनेन जनाः बाह्यगतिविधीन् परिहर्तुं निर्दिष्टाः । चीन-प्रशासनेन पूर्वमेव एतदर्थं रक्तवर्णीया सञ्चेतना उद्घोषिता आसीत्।

## झारखण्डराज्ये प्रदर्शनकारिणां छात्राणां आरक्षिणां च मध्ये तीव्रः सङ्घर्षः दृष्टः, येन सर्वकारस्य काठिन्यं वर्धितम्

परीक्षासु कथितानां अनियमितानां विषये राँची-नगरे प्रदर्शनं कुर्वन्तः छात्राः सोमवासरे, १० अगस्त-दिनाङ्के विधानसभायाः घेरावं (अवरोधं) कर्तुं प्राप्नुवन्। अस्मिन् अन्तरे प्रदर्शनकारिणां छात्राणां आरक्षिणां च मध्ये तीव्रः सङ्घर्षः दृष्टः। सोमवासरे विधानसभा-घेरावकाले द्वारं यावत् प्राप्तानां छात्राणां उपरि आरक्षिभिः यष्टिप्रहारः कृतः अश्रुबाष्पगोलकाः च क्षिप्ताः, येन पश्चात् छात्रैः सर्वकारेण च सह निर्णायकः सङ्घर्षः अभवत्। आरक्षिणां बर्बरतायाः विषये छात्रैः सर्वकारस्य उपरि अनेके गम्भीराः आक्षेपाः कृताः। अस्मिन् अन्तरे छात्रेषु यष्टिप्रहारात् अश्रुबाष्पगोलकक्षेपणात् च अनन्तरं झारखण्ड-सर्वकारस्य काठिन्यं वर्धमानं दृश्यते, यतः भाजपा-दलेन मङ्गलवासरे, ११ अगस्त-दिनाङ्के 'झारखण्ड-पिधानस्य' (झारखण्ड-बन्दस्य) घोषणाम् अकरोत्। एतादृश्यां स्थितौ अधुना प्रश्नः अस्ति यत् मुख्यमन्त्रिणः सोरेन-महोदयस्य अग्रिमं पदक्षेपं किं भविष्यति?

**प्रशासने छात्रेषु च मध्ये तीव्रः सङ्घर्षः**

यदा छात्राः विधानसभायाः अवरोधाय प्रस्थिताः, तदा प्रशासने छात्रेषु च मध्ये तीव्रः सङ्घर्षः दृष्टः। आरक्षिभिः छात्रेषु यष्टिप्रहारः कृतः अश्रुबाष्पगोलकाः अपि क्षिप्ताः। सायङ्कालः यावत् छात्रेषु पुनः यष्टिप्रहारः कृतः, यस्यानन्तरं छात्रैः सर्वकारस्य उपरि अनेके गम्भीराः आक्षेपाः कृताः। अन्या एका छात्रा अवदत् यत्— "एकतः झारखण्ड-सर्वकारः 'महिला-सम्मान-योजनाम्' चालयति, अपरतः च एते जनाः मातृभिः भगिनीभिः च सह ताडनं कुर्वन्ति।"



# गृहमन्त्री अमितशाहः 'हर घर तिरंगा' अभियानं राष्ट्रस्य सामूहिक-शक्तेः प्रतिविम्बम् अवदत्



गृहमन्त्री अमितशाहः अवदत् यत् 'हर घर तिरंगा' अभियानं राष्ट्रस्य सामूहिक-शक्तेः प्रतिविम्बम् अस्ति, यत् नागरिकान् 'विकसित-भारत'-निर्माणस्य प्रयत्ने एकत्रीकरोति। सामाजिक-माध्यम-सन्देषे श्रीशाहः अवदत् यत् अस्मिन् वर्षे 'वन्दे मातरम्' इत्यस्य १५० तमायाः वर्षगाँठ-कारणेन एतत् अभियानं प्रत्येक-देशभक्तस्य कृते भावुकं हृदयस्पर्शि च सञ्जातम्। श्रीशाहः नागरिकान् अकथयत् यत् ते तिरङ्ग-यात्रा-माध्यमेन, तिरङ्ग-र्याली-माध्यमेन, सामूहिक-रूपेण 'वन्दे मातरम्' गायन-माध्यमेन च अस्मिन् अभियाने भागं गृह्णन्तु उत्साहपूर्वकं च उत्सवं मानयन्तु। सः नागरिकेभ्यः तिरङ्ग-ध्वजारोहणं कर्तुं harghartiranga.com इत्यत्र स्वकीयां 'सेल्फी इति' अपलोड् कर्तुं च आग्रहम् अकरोत्।



### जम्मू-कश्मीर-राज्यस्य सर्वेषु जनपदेषु ध्वज-यात्रा

जम्मू-कश्मीर-राज्यस्य सर्वेषु जनपदेषु ध्वज-यात्राः देशभक्ति-पूर्ण-कार्यक्रमाश्च आयोज्यन्ते, यत्र जन-सामान्यैः सह शैक्षणिक संस्थानां सर्वकारीय-कार्यालयैः च राष्ट्रध्वजः प्रदर्शितः ।

### बिहारराज्ये ध्वजयात्रा

बिहारस्य राजधानी-पटना-नगरे मुख्यमन्त्रिणः सम्राट्-चौधरी इत्यस्य नेतृत्वे जेपी-सर्कल-तः कारगिल-चौक-पर्यन्तं दिव्या ध्वज-यात्रा समायोजिता, यस्यां बहवः छात्राः सामान्य-जनाश्च सम्भूय भागम् अगृह्णन्। नागालैण्ड-राज्यस्य कोहिमा-नगरे उच्चशिक्षा-पर्यटन-मन्त्री तेम्जेन्-इम्ना-आलोङ्ग-वर्येण द्विचक्रिका-ध्वज-यात्रा समायोजिता।

# प्रधानमन्त्री मोदी राष्ट्रमण्डल-क्रीडायाः विजेतृभिः सह सम्भाषणम् अकरोत्; मीराबाई-चानू-महोदयाम् आगामि-पीढीनां कृते प्रेरणायाः स्रोतः अवदत्



प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां स्वकीये आवासस्थाने राष्ट्रमण्डल-क्रीडा-२०२६ इत्यस्याः पदकविजेतृभिः सह मेलनम् अकरोत्। अस्मिन् अन्तरे पदकविजेतारः प्रधानमन्त्रिणा सह क्रीडासम्बद्धान् स्वकीयान् अनुभवान् संविभजानि कृतवन्तः। श्रीमोदी अस्मिन् प्रसङ्गे अवदत् यत्— "सम्मानः केवलं पट्टिका-कर्तनेन (रिबन-काटने से) न प्राप्यते, अपि तु एकस्य महत्त्वाकाङ्क्षिणः क्रीडकस्य मनसि उत्साहपूरणेन प्राप्यते।" सः क्रीडकान् 'खेलो इण्डिया' इत्यस्य प्रतिष्ठां वर्धयितुं प्रोत्साहितवान्। भारोत्तोलक-सैखोम-मीराबाई-चानू-महोदयया सह सम्भाषणं कुर्वन् प्रधानमन्त्री अवदत् यत् तस्याः विजयः आगामि-पीढीनां कृते प्रेरणायाः स्रोतः अस्ति। प्रधानमन्त्री अवदत् यत् देशस्य कृते निरन्तरं विजयप्राप्तौ भारतीय-क्रीडकानां समर्पित-प्रयत्नाः निरन्तर-सफलताः च छात्रान् प्रेरयन्ति।

सः अवदत् यत् राष्ट्रिय-क्रीडाणां सत्या सफलता केवलं भौतिक-मूलभूत-संरचनायाः उपरि आधारिता नास्ति, अपि तु सम्पूर्णे देशे व्यापक-क्रीडा-संस्कृतेः निर्माणे निर्भरा भवति। प्रधानमन्त्री देशं गौरवान्वितं कर्तुं पदकविजेतृभ्यः वर्धापनानि अददात् तेषां उज्ज्वल-भविष्यस्य कामनाम् च अकरोत्।

# संसदा बैङ्किङ्ग-व्यवस्थायाः आधुनिकीकरण-विधेयकं स्वीकृतम्




संसदा 'बैंकर्स बुक्स् एविडेन्स् विधेयकं, विंशतिः षड्विंशतिः पारितं गतम्, यत् लोकसभानन्तरं राज्यसभया अपि स्वीकृतम्। वित्तमन्त्रिणा निर्मला सीतारमण-इत्यनया उपस्थापितेन विधेयकेन डिजिटल्-बैङ्किङ्ग-अभिलेखानां साक्ष्य-रूपेण विधिक स्वीकार्यता सम्पुष्टा भवति। इतः प्राक् नीट्-विषये विपक्षस्य कोलाहलेन राज्यसभायाः कार्याचरणं बहुवारं स्थगितम् अभवत् ।

### लोकसभया अधिकरण-परिष्कार-विधेयकं पारितम्

लोकसभया अधिकरण-परिष्कार-विधेयकम् षड्विंशत्यधिक-द्विसहस्रतमं ध्वनिमतेन पारितम्। विविधानाम् अधिकरणाध्यक्षाणां सदस्यानां च अर्हतासु, नियुक्तौ, सेवापक्षाश्रयेषु च पारदर्शिताम्, स्वायत्तताम्, एकरूपतां च आनेतुम्, अथ च तेषां कार्यप्रणाल्यां दक्षता-वर्धनम् अस्य विधेयकस्य मुख्योद्देश्यं वर्तते। अस्य विधेः अन्तर्गतम् एकस्य राष्ट्रियाधिकरण-आयोगस्य स्थापनायाः अपि प्रस्तावः वर्तते। नीट्परीक्षा-प्रकरणे प्रदर्शनरतानां छात्राणामुपरि आरक्षकाणां कथित-कार्यचरणमवलम्ब्य विपक्षस्य कोलाहले विचार-विमर्श विनैव एतत् विधेयकं पारितम् । पीठासीनाधिकारी जगदम्बिका पालः अवोचत् यत् संसदीय कार्यमन्त्री किरेन रिजिजुः विपक्षस्य याचनां पूर्वमेव स्वीकृतवान्, अथ च केन्द्रीय गृहमन्त्री अमित शाहः छात्र-प्रदर्शन-सम्बन्धे वक्तव्यं दातुं सन्नद्धः अस्ति। किन्तु अविरत-कोलाहलेन सङ्कुलं सदनम् अवलोक्य सभापतिना आदिनाय सदनस्य कार्याचरणं स्थगितम्। इतः पूर्वं अपराह्ने द्विवादने द्वितीयस्थगनानन्तरं यदा सदनस्य कार्याचरणं पुनरारब्धम्, तदा केन्द्रीय-विधि-न्यायमन्त्री अर्जुन राम मेघवालः विपक्षस्य गम्भीर-कोलाहले एव एतत् विधेयकम् उपस्थापितवान्। ततः पूर्वम्, मध्याह्ने द्वादशवादने प्रथम-स्थगनानन्तरं यदा सदनं समवेतम्, तदा कृष्णाङ्गारक-खननमन्त्री जी. किशन रेड्डी खनि-खनिज-संशोधन-विधेयकम् उपस्थापितवान् ।

## छात्र-प्रदर्शन-प्रकरणे संसदि चर्चां कर्तुं प्रशासनं तत्परम् अस्ति - रिजिजूः

केन्द्रीय-मन्त्री किरेन रिजिजूः स्पष्टीकृतवान् यत् छात्र-प्रदर्शन-प्रकरणे संसदि चर्चां कर्तुं प्रशासनं तत्परम् अस्ति। कार्य-मन्त्रणा समित्याः उपवेशनात् परं तेन विपक्षेण सह सदनस्य कार्यं निर्बाधं सञ्चालयितुं सविनयम् आह्वानं कृतम्, येन गृहमन्त्री अमित शाहः एतद्विषये आधिकारिकं वक्तव्यं प्रदातुं शक्नुयात्।

# ट्राई (TRAI) अन्य-क्षेत्राणां संस्थाभ्यः लेन-देन-सेवा-सम्बन्धि-आह्वानेषु १६०१ क्रमाङ्क-श्रृङ्खलायाः उपयोगाय स्वीकृतिम् अददात्




भारतीय-दूरसञ्चार-नियामक-प्राधिकरणेन (TRAI) बैङ्किङ्ग-वित्तीयसेवा-बीमा-क्षेत्रैः तथा शासकीय-संस्थाभिः अतिरिच्य अन्य-क्षेत्रेषु कार्यरतानां संस्थानां लेन-देन-सेवा-सम्बन्धि-आह्वानानां (Calls) कृते १६०१ श्रृङ्खलायाः क्रमाङ्कानां उपयोग-विषये निर्देशाः निर्गताः। एताः शासकीय-संस्थाः १६०० श्रृङ्खलायाः क्रमाङ्कानां उपयोगं कुर्वत्यः सन्ति। सञ्चार-विभागः ट्राई-संस्थां सूचितवान् यत् तेन अधुना उपयोगिता, कुरियर्, लॉजिस्टिक्स-क्षेत्राणां संस्थाभिः एतादृश-आह्वानानां कृते विभागेन आवण्टित-१६०१ श्रृङ्खला-क्रमाङ्कानां चरणबद्ध-कार्यान्वयनम् आरब्धम्। अस्मिन् विद्युत्-वितरण-कम्पन्यः, जल-उपयोगिता-कम्पन्यः, नगर-ग्यास्-वितरण-कम्पन्यः, एलपीजी-वितरण-कम्पन्यः च सम्मिक्ताः सन्ति। अस्मिन् कुरियर्-कम्पन्यः, एक्स्प्रेस्-लॉजिस्टिक्स-कम्पन्यः, पार्सल-वितरण-सेवाप्रदातारः, माल-वहन-लॉजिस्टिक्स-सेवाप्रदातारः अपि सम्मिक्ताः सन्ति। एषा पृथक् श्रृङ्खला महत्त्वाकांक्षी-वित्तीय-ध्वनि-आह्वानानि (Voice Calls) अन्य-क्षेत्राणां सेवा-आदानप्रदानाह्वानेभ्यः पृथक् स्थापयितुं निर्गता अस्ति। मन्त्रालयेन उक्तं यत् विशिष्ट-क्रमाङ्क-पहचानः उपभोक्तृभ्यः वैध-सेवा-लेनदेन-आह्वानानां सुलभ-पहचाने समर्थान् करिष्यति, येन एतादृश-ध्वनि-आधारित-सञ्चारे विश्वासः सुदृढः भविष्यति। १६०१-श्रृङ्खलायाः क्रमाङ्काः दूरसञ्चार-सेवाप्रदातृभिः (TSP) उचित-सत्यापनानन्तरं साक्षात् पात्र-संस्थाभ्यः आवण्टिताः भविष्यन्ति, अस्य कृते दूरसञ्चार-सेवाप्रदातारः आदेश-निर्गमन-दिनाङ्कात् ९० दिनानां अन्तः पात्र-संस्थानां स्थानान्तरणं (Migration) संयोजनम् च पूर्णं कर्तुं कलिताः सन्ति।

# नेरवा-क्षेत्राय प्राप्ता नूतना अग्नि-शमन-केन्द्रम्, ५५ सहस्र-जनेभ्यः भविष्यति लाभः; १७ पदानि द्वे 'फायर-टेंडर'-वाहने च स्वीकृते



**हिमसंस्कृतवार्ता — शिमला।**
मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू-महोदयेन सोमवासरे शिमला-तः 'वर्चुअल'-माध्यमेन शिमला-मण्डलस्य नेरवा-मध्ये नव-स्थापितायाः अग्नि-शमन-केन्द्रस्य लोकार्पणं कृतम्। अस्मिन् अवसरे क्षेत्रवासिभ्यः वर्धापनं यच्छता मुख्यमन्त्रिणा उक्तं यत् एतद् अग्नि-शमन-केन्द्रं केवलम् अग्नि-दाहस्य घटनाभिः सह युद्धाय परिसीमिता न स्थास्यति, अपि तु महत्याः वर्षायाः, भूस्खलनस्य अन्यासां च आपत्कालीन-स्थितीनाम् अवसरेषु साहाय्य-रक्षण-कार्येषु अपि महत्त्वपूर्णं योगदानं करिष्यति। मुख्यमन्त्रिणा प्रोक्तं यत् अग्नि-शमन-केन्द्रस्य नेरवा-क्षेत्रस्य प्रायः ५५ सहस्र-जनेभ्यः लाभः लप्स्यते अत्र च द्वे वाहने शीघ्रमेव उपलब्धे कारयिष्येते।
तेन उक्तं यत् अग्नि-दाहस्य घटनासु क्षेत्रस्य पारम्परिकाणां काष्ठ-गृहाणाम्, व्यावसायिक-प्रतिष्ठानानाम् बहुमूल्यानां सेब-उद्यानानां च समयवत् सुरक्षणं कर्तुं शक्ष्यते। तेन प्रोक्तं यत् पूर्वं नेरवा-क्षेत्रे अग्नि-दाहस्य अथवा अन्यासाम् आपदां घटनासु चौपाल, देहा, ठियोग तथा च शिमला-तः अग्नि-शमन-वाहनानि प्रेषणीयानि भवन्ति स्म, येषां घटनास्थलम् प्राप्तुं बह्व्यः होराः (घण्टाः) लगन्ति स्म। अधुना स्थानीय-अग्नि-शमन-केन्द्रस्य स्थापनात् आपत्कालीन-स्थितौ त्वरिता कार्याचरिणा निश्चिता भविष्यति।
मुख्यमन्त्रिणा सुक्खू-महोदयेन उक्तं यत् नेरवा-अग्नि-शमन-केन्द्रस्य सुचारु-सञ्चालनाय १७ नूतनानि पदानि स्वीकृतानि सन्ति। एतदतिरिच्य द्वे नूतने अग्नि-शमन-वाहने अपि स्वीकृते स्तः तथा च विभागेन एकः 'वाटर-टेंडर-टाइप-बी'-वाहनमपि आवण्टितम्। तेन प्रोक्तं यत् अस्य वाहनस्य क्रयणे ५९ लक्ष-रूप्यकाणि व्ययीकृतानि। नेरवा-मध्ये अग्नि-शमन-केन्द्रस्य स्थापनात् क्षेत्रस्य आपत्कालीन-सुरक्षा-व्यवस्था इतोऽपि सुदृढा संजाता।
मुख्यमन्त्रिणा उक्तं यत् राज्यसर्वकारः ग्रामीण-अर्थव्यवस्थायाः सुदृढीकरणेन सहैव गृहेषु (ग्रामेषु) वसद्भ्यः जनेभ्यः तेषां गृह-द्वारेभ्यः समीपे नगर-सदृशाः श्रेष्ठाः सुविधाः उपलब्धं कारयितुं प्रतिबद्धः अस्ति। तेन प्रोक्तं यत् क्षेत्रे 'मिल्क-प्लांट' संस्थापयितुम् राज्यसर्वकारः आवश्यकीम् धनराशिम् उपलब्धं कारयिष्यति, यस्य कृते 'एफ.सी.ए.'-अनुमतिं प्राप्तुं प्रयासाः क्रियन्ते। तेन उक्तं यत् जनेभ्यः एकाच्छादने (एक ही छत के नीचे) विविधाः सर्वकारीय-सेवाः उपलब्धं कारयितुम् उद्देशेन 'चौपाल-मिनी-सचिवालयस्य-कृते द्वे कोटि-रूप्यके तथा च 'नेरवा-कुपवी-मिनी-सचिवालयस्य-कृते द्वे-द्वे कोटि-रूप्यके प्रसारिते स्तः।
अस्मिन् अवसरे नेरवा-मध्ये उपस्थितः काङ्ग्रेस-नेता रजनीशकिमटा-महोदयः अग्नि-शमन-केन्द्रस्य लोकार्पणाय मुख्यमन्त्राय कार्तज्ञ्यम् (आभारः) प्रकटितवान्। तेन उक्तं यत् क्षेत्रस्य बहु-वर्षेभ्यः पुरातनी याचना अद्य पूर्णताम् आगता अस्य केन्द्रस्य माध्यमेन नेरवा-सहितम् समीपस्थ-क्षेत्रेभ्यः लाभः लप्स्यते। तेन प्रोक्तं यत् वर्त्तमान-सर्वकारस्य काले चौपाल-विधानसभा-क्षेत्रे विकासस्य अनेकानि कार्याणि जातानि, येषां लाभः क्षेत्रवासिभ्यः लभ्यते। तेन मुख्यमन्त्रिणे चौपाल-विधानसभा-क्षेत्रस्य प्रवासं कर्तुम् निमन्त्रणम् अपि दत्तम्। अस्मिन् अवसरे अतिरिक्तः मुख्यसचिवः आर.डी. नजीमः, महानिदेशकः (होमगार्ड्स) सतवन्तअटवालः अग्नि-शमन-विभागस्य वरिष्ठाः अधिकारिणः च उपस्थिताः आसन्।

# 'सहारा'-योजनायै आवेदनम् इतोऽपि सुकरम् जातम्, 'ऑनलाइन'-मञ्चः (Platform) सज्जीकृतः

**हिमसंस्कृतवार्ता — शिमलाः।**
राज्यसर्वकारस्य एकेन प्रवक्त्रा ज्ञापितं यत् प्रदेशसर्वकारेण 'मुख्यमन्त्री-सहारा-योजनायाः' आवेदनात् भुक्ति-संवितरणं (Payment) यावत् प्रक्रियायाः अङ्कीकरणं (Digitization) कृत्वा सम्पूर्ण-प्रक्रियायाः सञ्चालनस्य आधुनिकीकरणाय एकः नूतनः 'ऑनलाइन-डिजिटल'-मञ्चः सज्जीकृतः, येन आवेदकेभ्यः सर्वासां योजनानाम् लाभः 'सिंगल-विंडो-मञ्च'-माध्यमेन प्राप्तः भवेत्। अनेन तेषाम् समयस्य व्ययस्य च रक्षणं निश्चितं भविष्यति। अधुना यावत् सामाजिक-न्याय-सशक्तीकरण-विभागाय १५६२ आवेदनानि 'ऑनलाइन'-मञ्चे प्राप्तानि सन्ति।
प्रवक्त्रा इच्छुकेभ्यः विलम्बितेभ्यः च आवेदकेभ्यः आग्रहः कृतः यत् ते स्वकीयम् आवेदनं https://himparivar.hp.gov.in/ekalyan इत्यस्मात् अथवा समीपस्थात् 'लोकमित्र-केन्द्रात्' कुर्वन्तु। आङ्गनवाड़ी-कार्यकर्त्र्यः लाभांशिनाम् परिचय-सत्यापने प्रक्रियात्मकासु औपचारिकतासु च पूरणाय आवश्यकीं साहाय्यतां करिष्यन्ति। एतदतिरिच्य, येषाम् आवेदकानाम् लाभांशिनां वा आवेदनानि हिमाचलप्रदेश-राष्ट्रिय-स्वास्थ्य-बीमा-सोसायटी-संस्थया स्थगितानि (Pending) आसन्, तेभ्यः अपि साहाय्य-राशये पुनः आवेदनं करणीयम् भविष्यति। प्रवक्त्रा उक्तं यत् अस्याः योजनायाः उद्देश्यम् आर्थिक-रूपेण दुर्बल-वर्गस्य तादृशानाम् गम्भीर-दीर्घकालिक-रोगैः ग्रसितानां रुग्णानाम् कृते आर्थिक-साहाय्यम् उपलब्धं कारयितुम् अस्ति, येषाम् दीर्घ-समयं यावत् उपचारस्य आवश्यकता भवति। तेन उक्तं यत् 'पार्किंसन'-रोगेन, 'मैलिग्नेंट-कैंसर'-रोगेन, स्थायि-दिव्याङ्गतया सह पक्षाघातेन (लकवा) पीडिताः दीर्घकालिक-उपचाराधीनाः शय्याग्रस्ताः वा रुग्णाः, 'मस्कुलर-डिस्ट्रॉफी', 'हीमोफीलिया', 'थैलेसीमिया', तीव्र-दीर्घकालिक-वृक्क-विफलता-रोगैः ग्रसिताः रुग्णाः तथा च अन्याभिः गम्भीरैः रोगैः पीडिताः जनाः, येषां कारणेन ते स्थायि-रूपेण कार्यं कर्तुम् असमर्थाः संजाताः, तादृशाः सर्वे जनाः मुख्यमन्त्री-सहारा-योजनायाः अन्तः आर्थिक-साहाय्याय पात्राः भविष्यन्ति। तेन प्रोक्तं यत् सर्वकारेण 'मुख्यमन्त्री-सहारा-योजनायाः' अन्तर्गतं ३८१३ पात्रेभ्यः, आधार-सत्यापितेभ्यः सक्रियाभ्यः लाभांशिभ्यः एव अप्रैल-तः जून २०२६-दिनाङ्कं यावत् अवधेः आर्थिक-साहाय्य-राशिः प्रसारिता अस्ति। तेन उक्तं यत् ९१ लाभांशिनः 'ई-केवाईसी'-सत्यापनं न कारितवन्तः, यस्मात् कारणात् तेभ्यः साहाय्य-राशिः न प्रसारिता। यथा एव ते स्वकीयम् 'ई-केवाईसी'-सत्यापनं निश्चितं करिष्यन्ति, तेभ्यः सम्बद्धेन मण्डल-कल्याण-अधिकारिणा राशिः प्रसारयिष्यते। तेन उक्तं यत् अस्याः योजनायाः विस्तृत-सूचनायै सम्बद्धेन मण्डल-कल्याण-अधिकारिणा तहसील-कल्याण-अधिकारिणा वा सह सम्पर्कः कर्तुं शक्यते।

# उदयमानसंस्थया बेङ्गलूरु-जल-संस्थायै नलिकेभ्यः जलस्राव निरीक्षणम् "



**हिमसंस्कृतवार्ताः- रविः खरिडेहालः बेङ्गलूरु।**
कावेरी-नद्याः जलं बेङ्गलूरुनगरं प्रति वहन्तः नलिकां निरीक्षितुम् उदयमानसंस्थायाः सेवां याचते। अगणितजलं यत् जलस्य अपव्ययस्य सूचकं भवति तत् सम्प्रति ३२.८४% अस्ति। २०१५-१६ तमे वर्षे ४८.४५% आसीत्। अस्य अर्थः अस्ति यत् प्रायः ३३% जलं स्रावमानस्य कारणेन वा अपव्ययितम् अथवा अवैधरूपेण सेवितम् अस्ति। हानिः महत्त्वं गृह्णाति यतोहि मैसूरस्य समीपे कावेरी-नदीतः जलं बेङ्गलूरुनगरं प्राप्नोति, ग्रीष्मकाले जलं दुर्लभं भवति। समस्यां दूरीकर्तुं जलप्रबन्धनसंस्थान सेवाः अन्विष्यन्ते। दत्तांशप्रतिरूपे स्थानम्, आयुः, प्रयुक्तसामग्री, नलिकाव्यासः, जलस्राव-आक्षेपान् इत्यादिभिः आचितं भविष्यति। एतेन उच्चक्रमस्य पूर्वानुमानेन सह प्रबन्धनस्य अनुमतिः भविष्यति।

# हिमाचल-पुलिसविभागे बृहत्-परिवर्तनम्, राज्य-सेवायाः ५४ अधिकारिणां स्थानान्तरणम्




**हिमसंस्कृतवार्ताः — शिमला ।**
हिमाचलप्रदेशसर्वकारेण सोमवासरे बृहत्-परिवर्तनं कुर्वता ५४ राज्य-पुलिस-सेवा-अधिकारिणां (HPS) स्थानान्तरणं कृतम्। एतेभ्यः अधिकारिभ्यः तत्काल-प्रभावेन नूतना नियुक्तिः दत्ता। मुख्यमन्त्रि-सुरक्षायाः आरक्षणा-अधीक्षकः (SP) शिवकुमारः शिमला-मध्ये सुरक्षा-गुप्तचर-आरक्षणा-अधीक्षकः रचितः। भूपिन्दरसिंहनेगी अधुना प्रथम-सशस्त्र-आरक्षणा-वाहिनी-जुङ्गा-इत्यस्य समादेशकः (Commandant) भविष्यति। अङ्कीय-अपराध-आरक्षणा-स्थानस्य (Cyber Crime Police Station) मण्डी-तः अतिरिक्त-आरक्षणा-अधीक्षकः मनमोहनसिंहः कुल्लू-मण्डलं प्रेषितः। सोलनस्य अतिरिक्त-आरक्षणा-अधीक्षकः राजकुमारः आरक्षणा-मुख्यालये शिमला-मध्ये अतिरिक्त-आरक्षणा-अधीक्षकः (अवकाश-आरक्षितः) इति पदे नियुक्तः। ऊना-मध्ये अवकाश-आरक्षितः अतिरिक्त-आरक्षणा-अधीक्षकः सुरिन्द्रकुमारः कुल्लू-मध्ये 'एंटी-नारकोटिक्स-टास्क-फोर्स' (ANTF) इत्यस्य अतिरिक्त-आरक्षणा-अधीक्षकः नियुक्तः। शिवरामचौधरी चतुर्थ-आई.आर.बी.एन.-जङ्गलबेरी-इत्यत्र अतिरिक्त-आरक्षणा-अधीक्षक-पदे नियुक्तः अस्ति। प्रवीणधीमानः अपराध-अनुसन्धान-विभागे (CID) मण्डी-मध्ये अतिरिक्त-आरक्षणा-अधीक्षक-पदे नियुक्तः। नरिन्द्रकुमारः सिरमौर-मण्डले (नाहन) अतिरिक्त-आरक्षणा-अधीक्षकः स्थापितः। राजकुमारः अतिरिक्त-आरक्षणा-अधीक्षकः (अवकाश-आरक्षितः) आरक्षणा-मुख्यालये शिमला-मध्ये, अजयकुमार-१ अतिरिक्त-आरक्षणा-अधीक्षकः ऊना-मध्ये, राजिन्द्रकुमारः अतिरिक्त-आरक्षणा-अधीक्षकः द्वितीय-आई.आर.बी.एन.-सकोह-काङ्गड़ा-मध्ये, सुरिन्दरकुमारः अतिरिक्त-आरक्षणा-अधीक्षकः 'एंटी-नारकोटिक्स-टास्क-फोर्स'-कुल्लू-मध्ये, सञ्जीवकुमार-१ अतिरिक्त-आरक्षणा-अधीक्षकः काङ्गड़ा-मध्ये (धर्मशाला), रमेशकुमारशर्मा अतिरिक्त-आरक्षणा-अधीक्षकः सोलन-मध्ये, योगेशरोल्टा अतिरिक्त-आरक्षणा-अधीक्षकः 'एंटी-नारकोटिक्स-टास्क-फोर्स'-शिमला-मध्ये, सञ्जीवकुमार-२ अतिरिक्त-आरक्षणा-अधीक्षकः राज्य-सतर्कता-भ्रष्टाचार-निरोधक-ब्यूरो-चम्बा-मध्ये, बीरबहादुरः अतिरिक्त-आरक्षणा-अधीक्षकः अङ्कीय-अपराध-आरक्षणा-स्थाने (Cyber Crime) मण्डी-मध्ये, सन्तोषकुमारशर्मा अतिरिक्त-आरक्षणा-अधीक्षकः अपराध-अनुसन्धान-विभागे (CID) शिमला-मध्ये नियुक्तः अस्ति।

एवमेव कुलदीपकुमारः अतिरिक्त-आरक्षणा-अधीक्षकः अङ्कीय-अपराध-आरक्षणा-स्थाने (Cyber Crime) काङ्गड़ा-मध्ये, प्रतापसिंहः अतिरिक्त-आरक्षणा-अधीक्षकः बिलासपुर-मध्ये, मनोहरलालः अतिरिक्त-आरक्षणा-अधीक्षकः चतुर्थ-आई.आर.बी.एन.-जङ्गलबेरी-मध्ये, विकासकुमारधीमानः अतिरिक्त-आरक्षणा-अधीक्षकः एच्.पी.आई.पी.एस.-काङ्गड़ा-मध्ये, हेमन्तकुमारः समादेशकः (Commandant) 'होमगार्ड्स'-कुल्लू-मध्ये, खजानारामः अतिरिक्त-आरक्षणा-अधीक्षकः एस.डी.आर.एफ.-मण्डी-मध्ये, रामप्रसादः अधुना अतिरिक्त-आरक्षणा-अधीक्षकः काङ्गड़ा-मध्ये (धर्मशाला), लालमानः अतिरिक्त-आरक्षणा-अधीक्षकः पञ्चम-इंडियन-रिजर्व-वाहिनी-बस्सी-मध्ये, तजिन्दरकुमारवर्मा उप-मण्डल-आरक्षणा-अधिकारी (SDPO) जवाली-मध्ये स्थापितः अस्ति।

एते डी.एस.पी.-अधिकारिणः अपि परिवर्तिताः अमरसिंहः डी.एस.पी. (अपराध) सी.आई.डी.-पदे नियुक्तः अस्ति। मनोजकुमार-२ डी.एस.पी. (मुख्यालयः) कुल्लू-मध्ये, डॉ. प्रतिभाचौहानः डी.एस.पी. (अवकाश-आरक्षितः) आरक्षणा-मुख्यालये शिमला-मध्ये, सञ्जयशर्मा उप-मण्डल-आरक्षणा-अधिकारी (SDPO) ज्वालामुखी, काङ्गड़ा-मण्डले नियुक्तः अस्ति।



सः आगामि-आदेशं यावत् एस.डी.पी.ओ.-देहरा-पदस्य अतिरिक्ताधिकारं अपि वहिष्यति। एवमेव अनिलकुमार-४ डी.एस.पी. राज्य-सतर्कता-भ्रष्टाचार-निरोधक-ब्यूरो-बद्दी-मध्ये, रमाकान्तठाकुरः एस.डी.पी.ओ. श्रीनैनादेवीजी-मध्ये, अजयठाकुरः डी.एस.पी. राज्य-सतर्कता-भ्रष्टाचार-निरोधक-ब्यूरो-शिमला-मध्ये, शेरसिंहः एस.डी.पी.ओ. डाडासीबा-मध्ये, विक्रमचौहानः डी.एस.पी. (मुख्यालयः) शिमला-मध्ये, सिद्धार्थशर्मा डी.एस.पी. (मुख्यालयः) सिरमौर-मध्ये, वरुणपटियालः एस.डी.पी.ओ. भावानगर-मध्ये, राजकुमारः डी.एस.पी. (मुख्यालयः) हमीरपुर-मध्ये, मङ्गतरामः एस.डी.पी.ओ. सङ्गड़ाह-मध्ये, गौरीदत्तः एस.डी.पी.ओ. ठियोग-मध्ये, अजयकुमारभारद्वाजः डी.एस.पी. (मुख्यालयः) सोलन-मध्ये स्थापितः अस्ति।

# अनुबन्ध-शिक्षकेभ्यः द्वयोः वर्षयोः कार्यकालस्य पूर्णतायाम् एव लप्स्यते नियमित-नियुक्तिः, उच्च-न्यायालयः स्पष्टीकृतवान्

**हिमसंस्कृतवार्ताः — शिमला ।**
हिमाचलप्रदेश-उच्च-न्यायालयः राज्यस्य सर्वकारीय-विद्यालयेषु कार्यरतानाम् अनुबन्ध-शिक्षकाणाम् (व्याख्याता-स्कूल-न्यू) प्रकरणे स्पष्टीकृतवान् यत् प्रशासनिक-विलम्बस्य निर्वाचन-आचारसंहितायाः वा व्याजेन (बहाने से) शिक्षकाः तेषाम् मौलिक-अधिकारात् वञ्चिताः कर्तुम् न शक्यन्ते। यदि कश्चन शिक्षकः द्वयोः वर्षयोः निरन्तरं अनुबन्ध-सेवाकालम् पूर्णं करोति, तर्हि सः तस्याः एव तिथितः नियमितीकरणस्य अधिकारी भवति। न्यायाधीशस्य विवेकसिंहठाकुरस्य न्यायाधीशस्य रञ्जनशर्मा-महोदयस्य च खण्डपीठेन उक्तं यत् यदा कर्मचारिणां चयनम् वैधानिक-नियमानाम् अन्तः स्वीकृत-पदेषु अभवत् तेषां कार्य-प्रदर्शनम् च सन्तोषजनकम् आसीत्, तर्हि तेषां समये नियमितं न करणं तेषाम् मौलिक-अधिकारणाम् उल्लङ्घनम् अस्ति। अनेन शिक्षकाः तेषाम् नियमित-वेतनमानात्, वार्षिकी-वेतन-वृद्ध्याः वरिष्ठतायाश्च वञ्चिताः कर्तुम् न शक्यन्ते। खण्डपीठेन राज्य-अधिकारिभ्यः निर्देशः दत्तः यत् ते याचिकाकर्तृभ्यः ३१ मार्च २०२४ दिनाङ्के द्वयोः वर्षयोः सेवां पूर्णं कृत्वा १ अप्रैल २०२४ दिनाङ्कात् नियमितं कुर्वन्तु तथा च अवशिष्ट-राश्या (Arrear) सह सर्वाणि आर्थिक-साहाय्यानि (वित्तीय लाभ) षट्-सप्ताहानाम् अभ्यन्तरे निश्चितं क्रियेरन्। एतदतिरिच्य नियमितीकरण-नीतेः नवम-खण्डम् (Clause 9) याचिकाकर्तृणां प्रकरणे अमान्यम् अप्रभावि च घोषितम्। पीठेन उक्तं यत् एषः नियमः सर्वकाराय स्वेच्छया नियमितं कर्तुम् असीम-शक्तिं ददाति, या संविधानस्य १४ तथा १६ अनुच्छेदयोः उल्लङ्घनम् अस्ति। याचिकाकर्ता मोहिन्द्रः इति सहिताः अन्याः च २०१९ वर्षे लोक-सेवा-आयोगस्य माध्यमेन चयन-प्रक्रियां पूर्णं कृत्वा नवम्बर-दिसम्बर २०२१ मध्ये व्याख्यातृ-पदे (स्कूल-न्यू) अनुबन्ध-आधारे नियुक्ताः अभवन्।




प्रदेशसर्वकारस्य २ दिसम्बर २०२३ दिनाङ्कस्य नीतेः अनुसारं ३१ मार्च २०२४ दिनाङ्कम् यावत् द्वयोः वर्षयोः निरन्तरं अनुबन्ध-सेवाकालम् पूर्णं कुर्वन्तः कर्मचारिणः नियमितीकरणीयाः आसन्। याचिकाकर्तारः नवम्बर-दिसम्बर २०२३ मध्ये एव स्वकीयौ द्वौ वर्षौ पूर्णौ कृतवन्तः आसन् ते च १ अप्रैल २०२४ दिनाङ्कात् नियमितीकरणस्य अधिकारिणः आसन्। तथापि, राज्यसर्वकारेण ते ६ जुलाई २०२४ दिनाङ्कात् (विलम्बेन सह) नियमिताः कृताः। राज्यसर्वकारस्य पक्षतः न्यायालये तर्कः दत्तः यत् लोक-सभा-उप-निर्वाचनानां कारणेन १६ मार्च २०२४ तः १४ जून २०२४ दिनाङ्कं यावत् आदर्श-निर्वाचन-आचारसंहिता प्रवर्तिता आसीत्, एतस्मात् कारणात् नियमितीकरण-आदेशस्य प्रसारणे विलम्बः अभवत्। नीतेः नवम-नियमस्य अनुसारं नियमितीकरणम् आदेशस्य प्रसारण-तिथितः एव प्रभावी मंस्यते, अतः एतत् पूर्वतन-तिथितः कर्तुम् न शक्यते। खण्डपीठेन सर्वकारस्य तर्काः निरस्ताः कुर्वता उक्तं यत् यदि कस्यापि कर्मचारिणः पात्रतायाम् कोऽपि सन्देहः नास्ति, तर्हि निर्वाचन-आचारसंहितायाः समाप्तेः अनन्तरम् सर्वकारस्य एतत् कर्तव्यम् भवति यत् सः पुनर्स्थापनायाः सिद्धान्तं प्रवर्तितम् कुर्यात्। सर्वकारस्य विलम्बस्य हानिः कर्मचारिणे दातुम् न शक्यते।

# सीतापुरे संस्कृतसप्ताहस्य आयोजनविषये गोष्ठी सम्पन्ना



हिमसंस्कृतवार्ताः — सत्येन्द्रपाठकः, लखनऊ।
सीतापुरम्। अवधप्रान्तस्य सीतापुरजनपदे संस्कृतसप्ताहस्य आयोजनविषये महत्त्वपूर्णा गोष्ठी सम्पन्ना। गोष्ठ्यां संस्कृतसप्ताहस्य कार्यक्रमाणाम् आयोजनं, संस्कृतस्य प्रचार-प्रसारः तथा विभिन्नकार्यक्रमानां रूपरेखा इत्यादीनां विषयाणां विषये विस्तृततया विचारविमर्शः कृतः।गोष्ठेः प्रारम्भः अंशुगुप्तेन ध्येयमन्त्रस्य उच्चारणेन अभवत्। ततः अवधप्रान्तमन्त्री डॉ. अनिलमहोदयेन उपस्थितान् कार्यकर्तॄन् सम्बोध्य संस्कृतसप्ताहस्य सफलायोजनाय कार्यकर्तॄणां सक्रियसहभागितायाः महत्त्वं प्रतिपादितम्।गोष्ठ्यां सीतापुरजनपदस्य सर्वे कार्यकर्तारः उपस्थिताः आसन्। संस्कृतसप्ताहे प्रत्येकं कार्यकर्ता स्वस्वक्षेत्रे विविधाः संस्कृतसम्बद्धाः कार्यक्रमाः आयोजयेत्, जनसामान्येषु संस्कृतस्य प्रचार-प्रसारं च कुर्यात् इति विषये विशेषतया चर्चा कृता। अस्मिन् अवसरे ऑनलाइन-संस्कृत-सम्भाषणवर्गस्य विषये अपि विचारविमर्शः अभवत्। संस्कृतभाषायाः सम्भाषणकौशलस्य विकासाय ऑनलाइन-माध्यमेन वर्गस्य सञ्चालनं तथा अधिकाधिकजनानां तस्मिन् सहभागिता सुनिश्चितं कर्तुं प्रयत्नः करणीयः इति प्रतिपादितम्। तदनन्तरं 'संस्कृतसन्देशः' इति संस्कृतभारत्या प्रकाशितायाः संस्कृतपत्रिकायाः विषये कार्यकर्तॄन् विज्ञापितम् । पत्रिकां कथं प्राप्तुं शक्यते, तस्याः सदस्यतां वा वितरणव्यवस्थां कथं कर्तुं शक्यते इत्यादीनां विषयाणामपि चर्चा कृता।गोष्ठ्यां संस्कृतसप्ताहस्य अवसरस्य सदुपयोगं कृत्वा स्वस्वक्षेत्रेषु संस्कृतसम्बद्धानां कार्यक्रमानाम् आयोजनं कर्तुं सर्वे कार्यकर्तारः प्रेरिताः। संस्कृतस्य जनभाषारूपेण प्रचाराय सामूहिकप्रयत्नस्य आवश्यकता अपि प्रतिपादिता। अन्ते शुभांशु -महोदयस्य शान्तिमन्त्रस्य उच्चारणेन गोष्ठ्याः समापनं जातम्।

# उत्तरप्रदेशे नूतना युवानीतिः, प्रतियोगीपरीक्षाणां सज्जतायै शैक्षणिकसंस्थासु कोचिङ्गव्यवस्था



हिमसंस्कृतवार्ताः- सत्येन्द्रपाठकः, लखनऊ।
उत्तरप्रदेशस्य योगी आदित्यनाथ-सर्वकारः युवानां हिताय नूतनां युवानीतिं प्रवर्तयितुं प्रयतते। मुख्यमन्त्री अभ्युदय-योजनायाः अन्तर्गतं प्रदेशस्य विश्वविद्यालयेषु, महाविद्यालयेषु तथा विद्यालयेषु छात्राणां कृते विविधानां प्रतियोगितापरीक्षाणां सज्जतायै कोचिङ्गव्यवस्था करिष्यते।
मुख्यमन्त्रिणा योगी आदित्यनाथेन उक्तं यत् प्रदेशस्य प्रत्येकस्मिन् जनपदे, महाविद्यालये तथा विश्वविद्यालये युवानां कृते मुख्यमन्त्री अभ्युदय- योजनायाः अन्तर्गतं कोचिङ्गस्य व्यवस्था करिष्यते। अस्यां व्यवस्थायां यूपीएससी, यूपीपीएससी, नीट्, जेईई इत्यादीनां प्रतियोगितापरीक्षाणां सज्जता कारयिष्यते।अस्याः योजनायाः अन्तर्गतं जिलाधिकारी, पुलिस- अधीक्षकाः, चिकित्सकाः, भारतीय- प्रौद्योगिकी- संस्थानात् च उत्तीर्णाः अभियन्तारः अपि छात्रान् पाठयिष्यन्ति। कोचिङ्गव्यवस्था प्रत्यक्षरूपेण तथा आभासीयमाध्यमेन उभयरूपेण भविष्यति। सर्वकारीय- महाविद्यालयेषु विद्यालयेषु च प्रतियोगितापरीक्षाणां कोचिङ्गस्य व्यवस्था प्रारभ्यते।योजनायाः माध्यमेन छात्रेभ्यः अध्ययनस्य सहैव प्रशासनिकाधिकारिणां अनुभवस्य लाभः अपि प्राप्स्यते। प्रत्येकं मासे आईएएस, आईपीएस, आईएफएस- अधिकारिणः च विद्यालयेषु महाविद्यालयेषु च गत्वा छात्रैः सह प्रत्यक्षं संवादं करिष्यन्ति। ते स्वानुभवस्य आधारेण प्रतियोगितापरीक्षाभ्यः, उच्चशिक्षायै तथा भविष्यस्य वृत्तिजीवनाय च छात्रान् मार्गदर्शनं दास्यन्ति। सर्वकारस्य अभिप्रायः युवान् नूतनव्यवस्थया सह संयोजयित्वा प्रतियोगितापरीक्षाणां सज्जतायां तेषां साहाय्यं करणम् अस्ति।

## प्रतियोगितापरीक्षासु मार्गदर्शनम्

मुख्यमन्त्रिणा अधिकारिभ्यः निर्देशः प्रदत्तः यत् ते छात्रान् केवलं प्रशासनिकसेवानां विषये एव न, अपितु चिकित्सा, अभियान्त्रिकी, सेना तथा अन्येषु क्षेत्रेषु अपि अग्रे गन्तुं समुचितं मार्गदर्शनं दद्युः। कोचिङ्गव्यवस्थायां यूपीएससी, यूपीपीएससी, यूपीएसएसएससी, एनडीए, जेईई, नीट् तथा सीयूईटी इत्यादीनां परीक्षाणां सज्जतायै मार्गदर्शनं तथा उचितरणनीतिनिर्माणे साहाय्यं प्रदास्यते। छात्रेभ्यः समयप्रबन्धनस्य प्रशिक्षणमपि दीयते, येन ते न्यूनसमये उत्तमरूपेण अध्ययनं कर्तुं शक्नुवन्ति।तदतिरिक्तं छात्रेभ्यः उच्चशिक्षा, तकनीकीशिक्षा, व्यावसायिकशिक्षा, रोजगारः, उद्यमिता तथा स्टार्टअप् इत्यादीनां अवसराणां विषये जानकारी प्रदास्यते। केन्द्रसर्वकारस्य राज्यसर्वकारस्य च युवसम्बद्धाः योजनाः अपि छात्रेभ्यः परिचाययिष्यन्ते।
अस्मिन् कार्यक्रमे वित्तीयकौशलम्, सञ्चारकौशलम्, व्यापारप्रबन्धनम्, साइबरसुरक्षा, नशामुक्तिः, तनावप्रबन्धनम् तथा आत्मविश्वासविकासः इत्यादयः विषयाः अपि समावेशिताः भविष्यन्ति।

## प्रतिमासं कार्यक्रमानां कालनिर्धारणं करिष्यन्ति जिलाधिकारिणः

जिलाधिकारिणः प्रतिमासं कार्यक्रमानां कालनिर्धारणं करिष्यन्ति। जनपदे नियुक्तानां सर्वेषां युवा- अधिकारिणां कार्यक्रमेषु सहभागिता सुनिश्चितं करिष्यते। आयोजितकार्यक्रमाणां संक्षिप्तविवरणं प्रत्येकस्य मासस्य पञ्चमदिनाङ्कपर्यन्तं माध्यमिकशिक्षाविभागाय प्रेषयितव्यं भविष्यति।

# संस्कृतभारत्याः गुर्जरप्रान्तस्य प्रान्त-अभ्यासवर्गः ऐठोरग्रामे सम्पन्नः

महेसाणाः संस्कृतभारत्याः गुर्जरप्रान्तस्य प्रान्त-अभ्यासवर्गः महेसाणा-जनपदस्य ऊंझा-निकटवर्तिनि ऐठोरग्रामे सफलतया सम्पन्नः। अस्मिन् प्रान्त-अभ्यासवर्गे कार्यकर्तॄणां मार्गदर्शनार्थं संस्कृतभारत्याः अखिलभारतीयमहामन्त्री श्री सत्यनारायणभट्टः तथाक्षेत्रसंघटनमन्त्री श्री विठ्ठलभट्टः विशेषरूपेण समागतवन्तौ।अभ्यासवर्गस्य माध्यमेन संस्कृतस्य प्रचार-प्रसारः, कार्यकर्तृनिर्माणम्, संगठनविस्तारः तथा समाजस्य विभिन्नवर्गेषु संस्कृतं कथं जन-जनपर्यन्तं प्रापयितुं शक्यते इत्यादिषु विषयेषु विस्तृतं मार्गदर्शनं प्रदत्तम्। विविधेषु सत्रेषु कार्यकर्तृभिः सक्रियतया सहभागित्वं कृत्वा संस्कृतकार्यस्य विस्ताराय आवश्यकाः योजनाः चर्चिताः।वर्गे आहत्य प्रायः ७५ कार्यकर्तारः उत्साहपूर्वकं सहभागितां कृतवन्तः। सम्पूर्णवर्गस्य वातावरणम् उत्साहपूर्णं प्रेरणादायकं च आसीत्। कार्यकर्तृभिः संस्कृतस्य प्रचार-प्रसाराय तथा समाजस्य जन-जनपर्यन्तं संस्कृतं नेतुं समर्पितभावेन कार्यं कर्तुं संकल्पः व्यक्तः।अस्य प्रान्त-अभ्यासवर्गस्य अध्यक्षत्वं डॉ. कृष्णप्रसाद निरौलामहोदयेन कृतम्। प्रान्तमन्त्रीरूपेण डॉ. रघुराम लश्करी, सहमन्त्रीरूपेण श्री वसन्तभाई जोशी, सञ्चालनदायित्वं डॉ. धीरेन्द्र मिश्रः, महाप्रबन्धकरूपेण श्री विष्णुभाई पटेल तथा महेसाणा-जनपद-संयोजकरूपेण श्री विष्णुभाई पटेल उपस्थिताः आसन्। सर्वैः दायित्वधारकैः कार्यक्रमस्य सफलतायै सक्रियतया सहयोगः प्रदत्तः। अभ्यासवर्गः गुर्जरप्रान्ते संस्कृतकार्यस्य विस्ताराय, कार्यकर्तॄणां क्षमताविकासाय तथा संस्कृतसेवायाः नवीनदिशानिर्धारणाय महत्त्वपूर्णः सिद्धः। कार्यक्रमस्य समापनसमये उपस्थितैः कार्यकर्तृभिः संस्कृतकार्यं अधिकाधिकं जनानां समीपं नेतुं दृढः संकल्पः कृतः।







संस्कृतभारत्याः गुर्जरप्रान्तस्य प्रान्त-अभ्यासवर्गः



# आदर्श-संस्कृत-ग्रामे कोटग्रामे प्रथमः अवस्थापनादिवसः सम्पन्नः





## भव्यया संस्कृतशोभायात्रया संस्कृतमयं जातं कोटग्रामम्।

कोटग्रामः, मोरी, उत्तरकाशी। उत्तराखण्ड-संस्कृत-संस्थानस्य, उत्तराखण्ड-सर्वकारस्य च निर्देशानुसारम् आदर्श-संस्कृत-ग्रामे कोटग्रामे सोमवासरे, १० अगस्त २०२६ दिनाङ्के प्रथमः अवस्थापनादिवस-समारोहः हर्षोल्लासेन उत्साहेन च सम्पन्नः। कार्यक्रमस्य आयोजनं ग्रामप्रधानद्वारा श्रीमती-संगीता-रावत-महोदयायाः अध्यक्षतायां ग्रामस्थे सोमेश्वर-महादेव-मन्दिर-प्राङ्गणे सम्पन्नम्।

कार्यक्रमात् पूर्वं प्रातः ११ वादने समस्ताः ग्रामवासिनः कुलाका-शिवमन्दिर-प्राङ्गणे समागताः। ततः तस्मात् स्थालात् भव्यसंस्कृत-शोभायात्रा प्रारब्धा, या सोमेश्वर-महादेव-मन्दिर-प्राङ्गणं यावत् अगच्छत्। शोभायात्रायां वैदिक-मन्त्राणां घोषेण, संस्कृतगीतैः संस्कृतजयघोषैश्च सम्पूर्णस्य ग्रामस्य वातावरणं संस्कृतमयम् अभवत्। ग्रामवासिनः विद्यार्थिनश्च महता उत्साहेन शोभायात्रायां सहभागितां कृतवन्तः।

समारोहे मुख्यातिथिरूपेण समाजसेवकः श्री लायवरसिंहरावत्-महोदयः, विशिष्टातिथिरूपेण श्री पिताम्बर-उनियाल-महोदयः तथा सारस्वता-तिथिरूपेण उच्चप्राथमिकविद्यालयस्य प्रधानाध्यापकः श्री कुशालसिंह-महोदयः, प्राथमिकविद्यालयस्य कोटग्रामस्य प्रधानाचार्यः श्री रोहिताश-उनियाल-महोदयश्च उपस्थिताः आसन्।अतिथिभिः स्वीयेषु उद्बोधनेषु संस्कृतभाषायाः महत्त्वं, भारतीयसंस्कृतेः संस्काराणां च संरक्षणम्, नवसन्ततेः संस्कृतेन सह संयोजनस्य आवश्यकता च विशेषतः प्रतिपादिता। तैः आदर्श-संस्कृत-ग्राम-कोटग्रामस्य अस्याः कार्यस्य प्रशंसा कृता तथा च ग्रामवासिनः अस्य विकासे निरन्तरं सहयोगं कर्तुं प्रेरिताः।

कार्यक्रमे विद्यार्थिभिः ग्रामवासिभिश्च विविधाः संस्कृत-सांस्कृतिक-कार्यक्रमाः, संस्कृतगीतानि, श्लोकपाठाः अन्याः च मनोहराः प्रस्तुतयः प्रस्तुताः। उपस्थितैः अतिथिभिः ग्रामवासिभिश्च विद्यार्थिनां प्रस्तुतयः प्रशंसिताः तथा ते उत्साहिताः।

कार्यक्रमस्य संयोजकेन आदर्श-संस्कृत-ग्रामस्य प्रशिक्षकेन आचार्य-माधवप्रसाद-पौडेल-महोदयेन कार्यक्रमस्य कुशलं सञ्चालनं कृतम्। स्वीयमन्तव्ये सः अवदत्— "संस्कृतं केवलं भाषा नास्ति, अपितु अस्माकं समृद्धायाः भारतीयसंस्कृतेः, परम्परायाः संस्काराणां च आधारशिला अस्ति। आदर्श-संस्कृत-ग्रामे कोटग्रामे ग्रामवासिनां विद्यार्थिनां च यः उत्साहपूर्णः सहभागः दृश्यते, तेन एतद् विश्वासपूर्वकं वक्तुं शक्यते यत् निकटभविष्ये अयं ग्रामः संस्कृतस्य संरक्षणे, संवर्धने, प्रचार-प्रसारे च अनुकरणीयं केन्द्रं भूत्वा सम्पूर्णस्य प्रदेशस्य कृते आदर्शं स्थापयिष्यति।" सः अवदत् यत् ग्रामवासिनां निरन्तरं सहयोगः सक्रियः सहभागश्च अस्य अभियानस्य महत्तमा शक्तिः अस्ति। सामूहिकप्रयत्नैः कोटग्रामः शीघ्रमेव संस्कृतस्य प्रचार-प्रसारस्य प्रमुखं केन्द्रं भूत्वा सम्पूर्णे प्रदेशे स्वकीयां विशिष्टां परिचितिं स्थापयिष्यति।

कार्यक्रमस्य अध्यक्षतां कुर्वत्या ग्रामप्रधानया श्रीमती-संगीता-रावत-महोदयया सर्वेषां अतिथीनां, ग्रामवासिनां, विद्यार्थिनां सहयोगिनां च प्रति आभारः व्यक्तः। सा अवदत् यत् ग्रामस्य आदर्श-संस्कृत-ग्रामरूपेण विकासाय ग्रामपञ्चायत् समस्ताश्च ग्रामवासिनः निरन्तरं सहयोगं प्रदास्यन्ति।

कार्यक्रमे बहुसंख्याकाः ग्रामवासिनः विद्यार्थिनश्च उत्साहपूर्वकम् उपस्थिताः आसन्। अनेन आयोजनेन संस्कृतभाषया सह भारतीयसंस्कृतेः, परम्परायाः संस्काराणां च संरक्षणस्य दिशि सकारात्मकः प्रेरणादायकश्च सन्देशः प्रदत्तः।

## "HTET-परीक्षायां संस्कृत-विभागस्य विद्यार्थिनां भव्यसफलता"







**हिमसंस्कृतवार्ता।** हरियाणा-केन्द्रीय-विश्व-विद्यालयस्य संस्कृतविभागेन पुनरेकवारं स्वकीयायाः शैक्षणिक-उत्कृष्टतायाः प्रमाणं प्रदर्शितम्। विभागस्य चतुर्दश प्रतिभाशालिनः विद्यार्थिनः प्रतिष्ठितायां हरियाणा-शिक्षक-पात्रता-परीक्षायां (HTET) उल्लेखनीयां सफलतां प्राप्य स्वविभागस्य विश्वविद्यालयस्य च गौरवं वर्धितवन्तः। एतेषु विद्यार्थिषु विजयपालः, चोखराजः, ज्योतिः, ज्योतिर्यादवः, रचना, चेतनश्च केवलं TGT-वर्गे सफलतां प्राप्तवन्तः। रितु, सपना, तन्नू, मनीषा च TGT-PGT चेत्युभययोः वर्गयोः सफलतां प्राप्तवत्यः। विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. टङ्केश्वरकुमारः सर्वेभ्यः सफलविद्यार्थिभ्यः अस्याः उल्लेखनीयायाः सफलतायाः कृते हार्दिकं अभिनन्दनं व्याजहार। सः स्वसन्देशे अवदत्— "एषा सफलता अस्माकं विद्यार्थीनां निरन्तरप्रयत्नस्य समर्पणस्य च शिक्षकाणां श्रेष्ठमार्गदर्शनस्यापि परिणामः अस्ति। अहं पूर्णतया विश्वसिमि यत् एते प्रतिभाशालिनः विद्यार्थिनः भविष्ये श्रेष्ठशिक्षकरूपेण राष्ट्रस्य समाजस्य च निर्माणे स्वमूल्यवान् योगदानं प्रदास्यन्ति।" संस्कृतविभागस्य विभागाध्यक्षा प्रो. पायल-कँवर-चन्देल-महोदया अपि सफलानां छात्राणां शुभकामनाः प्रदाय तेषां कठिनपरिश्रमस्य प्रशंसां कृतवती। सा प्रसन्नतां प्रकटयन्ती अवदत्— "अस्माकं विद्यार्थिभिः HTET-सदृश्यायां कठिनपरीक्षायां उत्कृष्टं प्रदर्शनं कृत्वा न केवलं स्वीयं, अपितु सम्पूर्णस्य संस्कृतविभागस्यापि गौरवं वर्धितम्। एषा सफलता विभागस्य अन्येषां विद्यार्थिनामपि कृते महती प्रेरणा अस्ति।" विभागीयाः शिक्षकाः डॉ. सुमनरानी, डॉ. देवेन्द्रसिंहराजपूतः, डॉ. सुमितशर्मा, डॉ. कृष्णकुमारः, डॉ. अर्चनाकुमारी च सफलविद्यार्थिभ्यः अस्याः उपलब्धेः कृते हार्दिकान् शुभकामनाः प्रदत्तवन्तः तथा तेषां उज्ज्वलभविष्यस्य कामनां कृतवन्तः। एषा सफलता न केवलम् एतेषां विद्यार्थिनां उज्ज्वलभविष्यस्य सुदृढं आधारं निर्माति, अपितु हरियाणा-केन्द्रीय-विश्वविद्यालयस्य संस्कृतविभागे प्रदीयमानायाः उच्चस्तरीयशिक्षायाः, उत्कृष्टाध्यापनस्य तथा कुशलमार्गदर्शनस्य च परिचायकत्वेन अपि तिष्ठति। सम्पूर्णस्य विश्वविद्यालयपरिवारस्य पक्षतः सर्वेभ्यः भावीशिक्षकेभ्यः तेषां स्वर्णिमभविष्याय अनन्ताः हार्दिकाः शुभकामनाः।

## शिमला-नगरे आयोज्यमानायां क्रीडा-सङ्घस्य उपवेशने संस्कृत-शिक्षक-परिषदः प्रतिनिधयः भागं ग्रहीष्यन्ति

शिमला। हिमाचलप्रदेशे वार्षिक-क्रीडा-सांस्कृतिक-गतिविधीनाम् आयोजनाय शिक्षा-विभागेन ११ अगस्त-दिनाङ्के शिमला-निदेशालये एकः उपवेशनं (बैठक) आहूतम् अस्ति। अस्मिन् उपवेशने क्रीडा-सङ्घस्य शिक्षकैः सह प्रारम्भिक-शिक्षा-सङ्घस्य शिक्षकाः अपि चर्चा-योजना-सन्दर्भे आमन्त्रिताः सन्ति। अस्मिन् विषये सूचनां यच्छन् संस्कृत-शिक्षक-परिषदः संरक्षकः डॉ. मनोज-शैल-महोदयः अकथयत् यत् विगत-दिने शिक्षा-विभागस्य अधिकारिणः प्रति एषः प्रस्तावः उपस्थापितः आसीत् यत् एतासु प्रतियोगितासु सांस्कृतिक-गतिविधीनाम् संयोजनाय राज्यस्य संस्कृत-शिक्षकाः अपि सम्प्रिक्ताः क्रियेरन्। अस्य प्रस्तावस्य विभागेन स्वागतं कृतम् उक्तं च यत्— "निश्चितरूपेण सांस्कृतिक-गतिविधीनाम् अन्तर्गत श्लोकोच्चारण-संस्कृतगीत-प्रतियोगितानां सन्दर्भे संस्कृत-शिक्षकैः अपि भागः ग्रहीतव्यः।" सः अवदत् यत् निदेशालये परिषदा स्वपक्षः उपस्थापितः। एतस्मात् कारणात् अद्यतने उपवेशने परिषदः प्रतिनिधिभ्यः अपि स्वपक्षस्य उपस्थापनाय निमन्त्रणं दत्तम् अस्ति। आशा अस्ति यत् परिषदः प्रदेशाध्यक्षः कमलकान्तः गौतमः तथा च सङ्गठन-मन्त्री शास्त्री-ललित-महोदयः प्रभावी रूपेण स्वपक्षं स्थापयिष्यतः।

संस्कृतगतिविधयः

## मण्डीजनपदः संस्कृतशिक्षकाणाम् उपनिदेशकेन सह मेलनम्, लम्बितानां याचनानां विषये ज्ञापनम् समर्पितम्



मण्डी। संस्कृत-शिक्षक-परिषद्-सङ्घस्य प्रतिनिधिमण्डलेन सोमवासरे उपनिदेशकेन प्रारम्भिक-उच्च-शिक्षाभ्यां सह मेलनं कृत्वा संस्कृत-शिक्षकाणां विविधानां लम्बितानां याचनानां विषये ज्ञापनम् असमर्पयत्। प्रतिनिधिमण्डलेन विभागस्य सम्मुखे शिक्षकाणां समस्याः प्रमुखतया उत्थाप्य तासां शीघ्र-समाधानस्य याचना कृता।ज्ञापने प्रदेशस्य विद्यालयेषु आवश्यकीनाम् मूलभूत-सुविधानां (अवसंरचनायाः) उपलब्धतां कारयितुम्, शिक्षण-व्यवस्थायाः आधुनिकीकरणाय तथा च विद्यालयानां क्रीडा-सांस्कृतिक-प्रतियोगितासु संस्कृत-गतिविधीनाम् समावेशाय याचना कृता।प्रतिनिधिमण्डले राज्य-वित्त-सचिवः लोकपालः, मण्डी-मण्डल-अध्यक्षः (जिलाध्यक्षः) कृष्णकुमारः तथा च मण्डल-सचिवः (जिला-सचिवः) सुरेन्द्रकुमारः उपस्थिताः आसन्।उपनिदर्शकेन प्रारम्भिक-उच्च-शिक्षाभ्यां प्रतिनिधिमण्डलं तेषां याचनासु (माङ्गेषु) उचित-विचारणायाः तथा च नियमानुसारम् आवश्यक-कार्याचरणस्य आश्वासनं दत्तम्। परिषद् आशां प्राकटयत् यत् विभागः शीघ्रमेव एतासां लम्बितानां याचनानां समाधानस्य दिशि दृढं पदक्षेपं करिष्यति।

## शिमला-मण्डलस्य संस्कृत-शिक्षक-परिषद् द्वारा उप-शिक्षा-निदेशिकायै ज्ञापनम् समर्पितम्



शिमला। शिमला-मण्डलस्य संस्कृत-शिक्षक-परिषद्-सङ्घस्य प्रतिनिधिमण्डलम् उप-शिक्षा-निदेशिकया सह सौहार्दपूर्णे वातावरणे मेलनम् अकरोत्। अस्मिन् मेलने परिषद्-प्रतिनिधिमण्डलेन शिक्षकाणां विविध-लम्बित-याचनानां विषये ज्ञापनम् असमर्पयत्।मेलनकाले उप-शिक्षा-निदेशिकायाः दृष्टिकोणः अतीव सकारात्मकः अनुकूलः च आसीत्। सा प्रतिनिधिमण्डलस्य समस्याः धैर्येण श्रुत्वा तासां नियमानुसारं शीघ्र-समाधानाय दृढम् आश्वासनं अददात्। अस्याः वार्तायाः अनन्तरं परिषद्-प्रतिनिधिमण्डलेन सन्तोषः प्राकटितः तथा च आशा व्यक्ता यत् शिक्षा-विभागः शीघ्रमेव संस्कृत-शिक्षकाणां हिताय एतासां माङ्गानां समाधानस्य दिशि आवश्यकं पदक्षेपं करिष्यति।

डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम

## लौकिकन्यायकोशः

# चक्षुर्दीपन्यायः

सर्वत्र अन्धकारे विद्यमाने सति घटस्य दर्शनं भवति चेत् तत् दर्शनम् नेत्रयोः तथा घटस्य उपरि आधारितं भवति। दिने दर्शनं क्रियते चेत् तथा अवलम्बनं न भवति। नेत्रयोः सामर्थ्येन घटः दृश्यते। परन्तु रात्रौ नेत्राभ्यां सह दीपप्रकाशः आवश्यकः। एवं ब्रह्मसाक्षात्कारे ब्रह्मविषयकम् अज्ञानं नाशयितुं वृत्तिव्याप्तेः (अहं ब्रह्मास्मीतिरूपायाः) अपेक्षा भवति। चिदाभासस्य अपेक्षा न भवति। (पञ्चदशी ७- ९२)

"चक्षुर्दीपावपेक्ष्येते घटादेर्दर्शने यथा।
न दीपदर्शने किन्तु चक्षुरेकमपेक्ष्यते।।"

(पञ्चदशी ७- ९३)



# वार्ता-संवादः

हिमसंस्कृतवार्ताः, ईदरधीररजः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि।
आङ्ग्लदेशस्य काचित् विचित्रा वार्ता मया श्रुता। तत्र मदिरालयेषु उत्थाय मद्यपानं सर्वकारेण निषिद्धम्। तेन नियमेन कोपिताः मदिरालय- स्वामिनः विरोधं कृतवन्तः सन्ति। तैः सः नियमः उपहसितः।
**नन्दिनी-** आङ्ग्लजनानां कृते तत् अतीव अनुचितम्! सिंहपुर-नगरस्य अपरा वार्ता अपि श्रूयताम्।
तत्र "विनोद-काफी" इति नाम्ना एका वञ्चनयोजना आरब्धा। अङ्कीय-धनस्य व्याजेन एका महिला जनान् वञ्चितवती अस्ति। सा महिला आरक्षकैः निगृहीता।
**काव्या-** हा कष्टम्! जनाः अतीव शीघ्रं वञ्चिताः भवन्ति। परन्तु तुर्कमेनस्थान-देशे एका मधुरा घटना संवृत्ता। तत्र सर्वकारेण "खर्बूज-दिनम्" इति राष्ट्रीयोत्सवः आचरितः। तत्र कृषकैः प्रदर्शन्यः आयोजिताः। तत् फलं तैः क्षेत्राणां राज्ञी इति मन्यते।
**नन्दिनी-** फलाय राष्ट्रीयोत्सवः खलु आश्चर्यकरः! परन्तु जर्मनदेशस्य बर्लिन-नगरे अतीव विचित्रा घटना दृष्टा। तत्र सप्तशतेन नग्न-जनैः ऊष्मकाले द्विचक्रिकाः चालिताः। प्रकृति-रक्षणाय देह-स्वास्थ्याय च तत् अभियानं तैः कृतम्। ऐतिहासिक-स्थानानां पुरतः तैः यात्रा कृता।
**काव्या-** मार्गे नग्नाः जनाः? सा खलु अतीव विचित्रा वार्ता! अस्तु, इदानीं वयम् अत्रैव विरमामः।





# दुनिया दे रंगां ने....

**अशोक दर्द, डलहौजी चंबा हिमाचल प्रदेश**

दुनिया दे रंगां ने जेहड़े रलीये।
अपणा पराया सबी जो छलीये।।

आजादी के मिल्ली लगी गेईयां मौजां।
सत्ता ने कितणे ई टब्बर पलीये।।

वक्ते दी मारा दे रंग निराले।
दिक्खे ओ मंजर के पत्थर गलीये।।

हिकड़ुए भुक्खा आग्ग के लाई।
प्रेम गीत लिक्खे दे सारे जलीये।।

उईयां थी यारां दी महफ़िल बहुतेरी।
औक्खिया घाटिया सारे टलीये।।

ओ चन्न ओ तारे ओ रुतां दे सूरज।
दिक्खदेयां दिक्खदेयां सारे ढलीये।।

दुनिया दा मेला नी हुजड़िया लोको।
कितणे ई आए ते कितणे चलीये।।

जिन्हां छ सत्ता दी जादूगरी थी।
खोट्टे भी सिक्के उन्हां दे चलीये।।

जिन्हां प होई गेई दर्द मेहर उसदी।
बिना तेले बतियां ओ दीए जलीये।।

## कांगड़े दा बज्रेश्वरी देवी मन्दिर

कांगड़े दा बज्रेश्वरी देवी मन्दिर साड़े हिमाचल प्रदेश दा एक बड़ा ही प्रसिद्ध ते पवित्र तीर्थ स्थल है। एह मन्दिर बावन (52) शक्तिपीठां च ते एक मन्नेया गैया है। एह् मन्या जान्दा है कि एथू माता सती रा खब्बा स्तन (छाती) गिरेया था, जिस जो बड़े ही आदर ते श्रद्धा कने पूज्या जान्दा है। पौराणिक कथां दे अनुसार, जालू माता सती री देह दे टुकड़े अलग-अलग जगह गिरदे गए, तालू एथू माता रा अंग गिरने च एह पीठ स्थापित होई गेया। बोलेया जान्दा है कि महाभारत रे वेले पांडवां एथू आणे री कृपा कीती थी ते माता री पूजा-अर्चना कीती थी। एह मन्दिर अपनी अकूत धन-दौलत ते खजाने ताईं भी प्रसिद्ध था। इदे कारण कई विदेशी हमलावरां जिन्हा च महमूद गजनवी भी था, एथू हमला किता ते मन्दिर जो लुट्टेया। पर साड़े कांगड़े रे लोकां ते भक्त-जनां एदे बाद भी मन्दिर रा पुनरुद्धार किता, कन्ने एदा गौरव वापस लेई आए। एह् साड़े कांगड़े री संस्कृति ते इतिहास री पहचान भी है।